# ऋषिमण्डल-स्तोत्र

आद्यंताक्षरसंलक्ष्यमक्षरं व्याप्य यत्स्थितम् |
अग्निज्वालासमं नादं बिन्दुरेखासमन्वितम् ||१||

अग्निज्वाला-समाक्रान्तं मनोमल-विशोधनम् |
दैदीप्यमानं हृत्पद्मे तत्पदं नौमि निर्मलम् ||२|| युग्मम् |

ओं नमोऽर्हद्भ्य :      शेभ्य: ओं सिद्धेभ्यो नमो नम: |
ओं नम: सर्वसूरिभ्य: उपाध्यायेभ्य: ओं नम: ||३||

ओं नम: सर्वसाधुभ्य: तत्त्वदृष्टिभ्य: ओं नम: |
ओं नम: शुद्धबोधेभ्यश्चारित्रेभ्यो नमो नम: ||४|| युग्मम् |

श्रेयसेऽस्तु श्रियेऽस्त्वेतदर्हदाद्यष्टकं शुभम् |
स्थानेष्वष्टसु संन्यस्तं पृथग्बीजसमन्वितम् ||५||

आद्यं पदं शिरो रक्षेत् परं रक्षतु मस्तकम् |
तृतीय रक्षेन्नेत्रे द्वे तुर्यं रक्षेच्च नासिकाम् ||६||

पंचमं तु मुखं रक्षेत् षष्ठं रक्षतु कण्ठिकाम् |
सप्तमं रक्षेन्नाभ्यंतं पादांतं चाष्टमं पुन: ||७|| युग्मम् |

पूर्व प्रणवत: सांत: सरेफो द्वित्रिपंचषान् |
सप्ताष्टदशसूर्यांकान् श्रितो बिन्दुस्वरान् पृथक् ||८||

पूज्यनामाक्षराद्यास्तु पंचदर्शनबोधकम् |
चारित्रेभ्यो नमो मध्ये ह्रीं सांतसमलंकृतम ||9||
जाप्य मंत्र:- ओं ह्रां ह्रीं ह्रुं ह्रूं ह्रें ह्रैं ह्रौं ह्र : अ सि आ उ सा
सम्यग्दर्शन- ज्ञान-चारित्रेभ्यो ह्रीं नम:।

जंबूवृक्षधरो द्वीप: क्षारोदधि समावृत: |
अर्हदाद्यष्टकैरष्ट – काष्ठाधिष्ठैरलंकृत: ||१||

तन्मध्ये संगतो मेरु: कूटलक्षैरलंकृत: |
उच्चैरुच्चैस्तरस्तार: तारामंडलमंडित: ||२||

तस्योपरि सकारांतं बीजमध्यास्य सर्वगम् |
नमामि बिम्बमाहर्त्यं ललाटस्थं निरंजनम् |३| विशेषकम् |

अक्षयं निर्मलं शांतं बहुलं जाड्यतोज्झितम् |
निरीहं निरहंकारं सारं सारतरं घनम् ||४||

अनुश्रुतं शुभं स्फीतं सात्त्विकं राजसं मतम् |
तामसं विरसं बुद्धं तैजसं शर्वरीसमम् ||५||

साकारं च निराकारं सरसं विरसं परम् |
परापरं परातीतं परं परपरापरम् ||६||

सकलं निष्कलं तुष्टं निर्भतं भ्रान्तिवर्जितम् |
निरंजनं निराकांक्षं निर्लेपं वीतसंशयम् ||७||

eAstroHelp

ब्रह्माणमीश्वरं बुद्धं शुद्धं सिद्धमभंगुरम् |
ज्योतीरूपं महादेवं लोकालोकप्रकाशकम् ||८|| कुलकम् |

अर्हदाख्यः सवर्णान्तः सरेफो बिंदुमंडितः |
तुर्यस्वरसमायुक्तो बहुध्यानादिमालितः ||९||

एकवर्णं द्विवर्णं च त्रिवर्ण तुर्यवर्णकम् |
पंचवर्णं महावर्णं सपरं च परापरम् ||१०|| युग्मम् |

अस्मिन् बीजे स्थिताः सर्वे ऋषभाद्या जिनोत्तमाः |
वर्णैर्निजैर्निजैर्युक्ता ध्यातव्यास्तत्र संगताः ||११||

नादश्चंद्रसमाकारो बिंदुर्नीलसमप्रभः |
कलारुणसमासांतः स्वर्णाभः सर्वतोमुखः ||१२||

शिरः संलीन कारो विनीलो वर्णतः स्मृतः |
वर्णानुसारिसंलीनं तीर्थकृन्मंडलं नमः ||१३|| युग्मम् |

चंद्रप्रभपुष्पदन्तौ नादस्थितिसमाश्रितौ |
बिंदुमध्यगतौ नेमिसुव्रतौ जिनसत्तमौ ||१४||

पद्मप्रभवासुपूज्यौ कलापदमधिश्रितौ |
शिर स्थितसंलीनौ सुपार्श्वपार्श्वौ जिनोत्तमौ ||१५||

शेषास्तीर्थंकराः सर्वे हरस्थाने नियोजिताः |
मायाबीजाक्षरं प्राप्ताश्चतुर्विंशतिरहंताम् ||१६||

गतरागद्वेषमोहाः सर्वपापविवर्जिताः |
सर्वदा सर्वलोकेषु ते भवंतु जिनोत्तमाः ||१७|| कलापकम् |

देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभा |
तयाच्छादितसर्वांगं मां मा हिंसन्तु पन्नगाः ||१८||

देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभा |
तयाच्छादितसर्वांगं मां मा हिंसतु नागिनी ||१९||

देवदेवस्य यच्चकं तस्य चक्रस्य या विभा |
तयाच्छादितसर्वांगं मां मा हिंसन्तु गोनसाः ||२०||

देवदेव.——— हिंसन्तु वृश्चिकाः ||२१||

देवदेव.——— हिंसतु काकिनी ||२२||

देवदेव.——— डाकिनी ||२३||

देवदेव.——— शाकिनी ||२४||

देवदेव.——— राकिनी ||२५||

देवदेव.——— लाकिनी ||२६||

देवदेव.——— शाकिनी ||२७||

eAstroHelp

देवदेव.——— हाकिनी ||२८||

देवदेव.——— हिंसन्तु राक्षसा: ||२९||

देवदेव.——— व्यंतरा: ||३०||

देवदेव.——— भेकसा: ||३१||

देवदेव.——— ते ग्रहा: ||३२||

देवदेव.——— तस्करा: ||३३||

देवदेव.——— वह्नय: ||34||

देवदेव.——— श्रृंगिण: ||३५||

देवदेव.——— दंष्ट्रिण: ||३६||

देवदेव.——— रेलपा: ||३७||

देवदेव.——— पक्षिण: ||३८||

देवदेव.——— मुद्गला: ||३९||

देवदेव.——— जृंभका: ||४०||

देवदेव.——— तोयदा: ||४१||

देवदेव.——— सिंहका: ||४२||

देवदेव.——— शूकरा: ||४३||

देवदेव.——— चित्रका: ||४४||

देवदेव.——— हस्तिन: ||४५||

देवदेव.——— भूमिपा: ||४६||

देवदेव.——— शत्रव: ||४७||

देवदेव.——— ग्रामिण: ||४८||

देवदेव.——— दुर्जना: ||४९||

देवदेव.——— व्याधय: ||५०||

श्रीगौतमस्य या मुद्रा तस्या या भुवि लब्धय: |
ताभिरभ्यधिकं ज्योतिरर्ह: सर्वनिधीश्वर: ||५१||

पातालवासिनो देवा देवा भूपीठवासिन: |
स्व:स्वर्गवासिनो देवा सर्वे रक्षंतु मामित: ||५२||

येऽवधिलब्धयो ये तु परमावधिलब्धय: |
ते सर्वे मुनयो दिव्या मां संरक्षन्तु सर्वत: ||५३||

eAstroHelp

ओं श्रीः ह्रीश्च धृतिर्लक्ष्मी गौरी चंडी सरस्वती |
जयाम्बा विजया क्लिन्नाऽजिता नित्या मदद्रवा ||५४||

कामांगा कामवाणा च सानंदा नंदमालिनी |
माया मायाविनी रौद्री कला काली कलिप्रिया ||५५||

एताः सर्वा महादेव्यो वर्तन्ते या जगत्त्रये |
मम सर्वाः प्रयच्छंतु कान्तिंलक्ष्मीं धृतिं मतिम् ||५६||

दुर्जनाः भूतवेतालाः पिशाचा-मुद्गलास्तथा |
ते सर्वे उपशाम्यंतु देवदेवप्रभावतः ||५७||

दिव्यो गोप्यः सुदुष्प्राप्यः श्रीऋषिमंडलस्तवः |
भाषितस्तीर्थनाथेन जगत्त्राणकृतोऽनघः ||५८||

रणे राजकुले वह्नौ जले दुर्गे गजे हरौ |
श्मशाने विपिने घोरे स्मृतौ रक्षति मानवम् ||५९||

राज्यभ्रष्टा निजं राज्यं पदभ्रष्टा निजं पदं |
लक्ष्मीभ्रष्टाः निजां लक्ष्मीं प्राप्नुवन्ति न संशयः ||६०||

भार्यार्थी लभते भार्या पुत्रार्थी लभते सुतम् |
धनार्थी लभते वित्तं नरः स्मरणमात्रतः ||६१||

स्वर्णे रूप्येऽथवा कांस्ये लिखित्वा यस्तु पूजयेत् |
तस्यैवेष्टमहासिद्धिर्गृहे वसति शाश्वती ||६२||

भूर्जपत्रे लिखित्वेदं गलके मूर्ध्नि वा भुजे |
धारितः सर्वदा दिव्यं सर्वभीतिविनाशनम् ||६३||

भूतैः प्रेतैर्ग्रहैर्यक्षैः पिशाचैर्मुद्गलैस्तथा |
वातपित्तकफोद्रेकैर्मुच्यते नात्र संशयः ||६४||

भूर्भुवः स्वस्त्रयोपीठवर्तिनः शाश्वता जिनाः |
तैः स्तुतैर्वन्दितैर्दृष्टैर्यत्फलं तत्फलं स्मृतेः ||६५||

एतद्गोप्यं महास्तोत्रं न देयं यस्य कस्यचित् |
मिथ्यात्ववासिनो देयम् बाल-हत्या पदे पदे ||६६||

आचाम्लादितपः कृत्वा पूजयित्वा जिनावलिम् |
अष्टसाहस्त्रिको जाप्यः कार्यस्तत्सिद्धिहेतवे ||६७||

शतमष्टोत्तरं प्रातर्ये पठंति दिने दिने |
तेषां न व्याधयो देहे प्रभवंति च सम्पदः ||६८||

अष्टामासावधिं यावत् प्रातः प्रातस्तु यः पठेत् |
स्तोत्रमेतन्महातेजस्त्वर्हद्बिम्बं स पश्यति ||६९||

दृष्टे सत्यार्हते बिंबे भवे सप्तमके ध्रुवम् |
पदं प्राप्नोति विश्रस्तं परमानंदसंपदां ||७०|| युग्मम्

इदं स्तोत्रं महास्तोत्रं स्तुतीनामुत्तमं परम् |
पठनात्स्मरणाज्जाप्यात् सर्वदोषैर्विमुच्यते ||७१||

।। इति ऋषिमंडल-स्तोत्रम् संपूर्णम् ।।

eAstroHelp